Amaravani SamvAdaH

अमरवाणी संवादः

Document Information

Text title : Amaravani Samvadah

File name : amaravANIsamvAdaH.itx

Category : misc

Location : doc_z_misc_general

Transliterated by : samskrit.samvadah@gmail.com

Proofread by : samskrit.samvadah

Description/comments : Sarhidaya, The Sanskrit Journal, Ed. R. Krishnamachariar, 1892 Vol XX, No. 1, 3, 4

Latest update : May 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 2, 2025

sanskritdocuments.org

Amaravani SamvAdaH

अमरवाणी संवादः

सहृद्‌यायां पत्रिकायां १९१५ ख्रिस्ताब्दे प्रकाशितोऽयं अमरवाणीनामधेयः सुसंवादः ।
॥ श्रीः ॥

॥ अमरवाणी ॥

रामशास्त्री - पण्डितवर्य चिराद्दृष्टोऽसि । कथं वर्तते गैर्वाणीप्रवचनं युष्मदीयाङ्ग्लमहापाठशालायाम् ।

लक्ष्मणशास्त्री - जिह्रेम्यहं वक्तुम् । बह्वीषु आङ्ग्लकलाशालासु एषा अनुपयुक्तेति अर्धचन्द्रं दत्त्वा निष्कासिता । मदीये विद्यालये तु यथेयं स्वयमेव क्षीणा क्रमेणादर्शनं गच्छेत् तथा प्रयत्न अनुष्ठीयते ।

राम - किमपराद्धमनया तपस्विन्या ।

लक्ष्मण - तस्याः सत्त्वैवापराध्यति ।

राम - न खल्ववगच्छामि ।

लक्ष्मण - सा हि पूर्वमेव आङ्ग्लैर्विपश्चिद्वरैः मृतकोटिषु परिगणिता । अस्मदीयाः पण्डितास्तु न तथा मन्यन्ते । एते ह्येनां चिरजीविनीं देववाणीम् अमृतकोटिषु गणयन्ति ।

राम - परस्परविरुद्धमिदमाशयद्वयं विमृश्यकोटिमाटीकते ।

लक्ष्मण - किमत्र विमर्शेन । ते ते स्वीयं सिद्धान्तं सोपपत्तिकं निरूपयितुमुद्युञ्जते । तस्मादियं मृता अमृता चेत्यभ्युपगन्तव्यमेव ।

राम - विरुद्धधर्माणामेकत्र समावेशः कथमभ्युपगन्तव्यः सूक्ष्मदर्शिभिः ।

लक्ष्मण - अस्तीत्येके नायमस्तीति चैके इत्युक्तरीत्या पाश्चात्यानां तन्मतानुयायिनां चैषा मृतैव । अस्माकं तु नित्येयममरवाणी ।

राम - कैर्हेतुभिरेषा मृतेति निश्चिता पाश्चात्यैः ।

लक्ष्मण - स्वीयेन दौर्भाग्येन ।

राम - कस्य ।

लक्ष्मण - उभयोरपि ।

राम - पाश्चात्यानां गैर्वाण्याश्च दौर्भाग्यममुत्र निदानमित्याशङ्कत इव ते हृदयम् ।

लक्ष्मण - आं तथा पाश्चात्याः प्रायः सर्वेष्वपि विषयेषु अभिनन्दनीयं बुद्धिवैशद्यमावहन्तीति सर्वविदितमिदम् । अथाप्येते गैर्वाण्याः स्वरूपं कार्त्स्न्येनावगन्तुं न प्रभवन्ति । गैर्वाण्यपि आत्मनः सौन्दर्यमस्माकं सर्वेणापि प्रकारेण प्रदर्शयन्ती पाश्चात्यैः केवलं चर्ममेदोमांसादिविरहिता अस्थिमात्रावशेषा परिदृश्यते । किं क्रियतामस्मिन् दैवायत्ते कर्मविपाके ।

राम - नेदं विश्वसनीयम् । भाषापठने सर्वेप्यधिकारिण एव । अस्माभिरवगता विषयाः पाश्चात्यैर्नाबोधिषत इति किल भवानाह ।

लक्ष्मण - कः संशयः । पाश्चात्यानां भाषायां पाण्डित्यं नास्ति । छन्दसाम् अध्ययने यावानानन्दः श्लोकानां पठने यावती रसस्फूर्तिः रमणीयानां पद्यानामनुशीलने यावानाह्लादः सरसानां गद्यानामुच्चारणे यावती च प्रीतिः समुन्मिषति इत्यादिकं स्वानुभवेनेमे ज्ञातुं न शक्नुवन्ति ।

राम - किमेतावता ।

लक्ष्मण - सरसैर्वाग्विलासैरावर्जितलोकलोचनां हावभावादिभिराकृष्टयुवजनमानसां सुन्दरीमनुपश्यन्तः कविवराः तस्या विलासविभ्रमादिकं प्रशंसन्ति । तामेव मूकीभूतवाग्व्यापारां रुग्णशय्यामधिगतामनुपश्यन्तो भिषग्वराः नासादीनामवयवानां च परस्परमानुगुण्यं जठरादीनाम् अन्तर्नाडीनां च मानोन्मानादिष्वौचित्यं च प्रशंसन्ति । एवमेव गैर्वाणीविषये वयं कविवराः पाश्चात्यास्तु भिषग्वराः । इयानेव भेदः ।

राम - भाषायाः सौकुमार्यविज्ञाने अस्मदीयेष्वपि शास्त्रिवर्येषु परस्परमाशयभेद उपलभ्यते । इदमेवाभिप्रेत्य नीलकण्ठदीक्षितेनोक्तम्

वाचं कवीनामुपलालयन्त्यां
भुङ्क्ते रसज्ञो युवतिं युवेव ।
तामेव भुङ्क्ते ननु तार्किकोऽपि
प्राणान्हरन्भूत इव प्रविष्टः ॥ इति

लक्ष्मण - सत्यम् । तार्किकाः शाब्दबोधविचारतत्पराः शाब्दिकाः प्रक्रियानिपुणाः मीमांसकाः न्यायसंचारवेदिनः वेदान्तिनः अध्यात्मरहस्यावगमबद्धदीक्षाः स्वीयसंस्कारानुगुणं भाषाया रसमास्वादयन्ति । भिन्नरुचिर्हि लोकः इति न्यायमनुसृत्य रसास्वादनप्रकारे भेदः स्वाभाविक

एव । अथापि भाषायाः सौन्दर्यसौकुमार्यादिविषये अस्मदीयपण्डितानाम् आशयः प्रायेण एकरूप एव ।

राम - पाश्चात्याः किमर्थमीदृशान्गुणान् न गणयन्ति ।

लक्ष्मण - ते हि धातूनां प्रकृतीनां प्रत्ययानां च स्वरूपविज्ञाने महान्तं परिश्रममङ्गीकृत्य भाषाणां परस्परसंबन्धावेदकं नवीनं किमपि शास्त्रं निर्माय तदङ्गतया गैर्वाणीपठनोद्यममनुतिष्ठन्ति ।

राम - इदमप्यावश्यकमेव किल ।

लक्ष्मण - अस्थीनि शरीरस्य आवश्यकानीत्यत्र कस्य वा विप्रतिपत्तिः । शुष्कास्थिपरिशीलनेन भाषायाः सौकुमार्यादिकं न ज्ञायेत । मनुष्यशरीरस्य वानरशरीरस्य च सौसादृश्यमनेकेष्वंशेषूपलभ्यते इत्यतो हेतोः मनुष्यो वानरात्समुत्पन्नः इति सिद्धान्तितं केनचित्पाश्चात्यपण्डितेन । एवमेव गैर्वाण्याः भाषान्तराणां च प्रकृतिप्रत्ययधातुस्वरूपेषु संवादः सादृश्यं वा वर्तते इति हेतोः तासामेकस्मिन्गणे निवेशः अङ्गीक्रियते । आर्यभाषागणः द्रमिडभाषागणः इत्यादयो भाषाशास्त्रे निरूप्यन्ते ।

राम - किं प्रयोजनमनया काकदन्तपरीक्षया ।

लक्ष्मण - भाषाशास्त्रं नामेदं वैदुष्यस्य निकषत्वेन परिगण्यते पाश्चात्यैः ।

राम - तर्हि यद्यद्भाषाशास्त्रे नोपयुज्यते तत्सर्वं पठनानर्हमिति ते विश्वसन्तीति प्रतिभाति ।

लक्ष्मण - विषयान्तराणां पठनेन बुद्धिवैशद्यं न लभ्यते इति ते विश्वसन्ति ।

राम - सर्वः कान्तमात्मीयं पश्यति ।

राम - निरूपणशीला हीमे सदसद्विवेचनचतुराः कथमेवमात्मदोषान्न पश्यन्ति ।

लक्ष्मण - ईश्वरमायैवात्र निदानम् ।

राम - हेतुनानेन न संतुष्यामि । समीचीनं कारणमन्वेषणीयम् ।

लक्ष्मण - किञ्चिद्विचिन्त्य । आत्मदोषावगमः सत्वगुणसंपन्नानामेव संभवति । आहारशुद्धौ सत्वशुद्धिः । मधुमांसप्रायमाहारमनुसेवतामेतेषां कथं सत्वोद्रेकस्यावसरः । राजसा हीमे पार्थिवभोगानुसेवनमेव जीवितफलं मन्वाना आत्मानुशासनप्रकारं नैव जानन्ति । देहात्मवादिनो बहव एतेषूपलभ्यन्ते ।

राम - देववाण्यामतिमहान्तमादरमाविष्कुर्वन्तीमे इति किल मया श्रुतम् । अतः शास्त्रपरिशीलनेन तैरात्मगुणसंपत्तिरधिगन्तुं शक्यते खलु ।

लक्ष्मण - उक्तः किल मया तेषां गैर्वाणीपठनसंप्रदायः ।

राम - कोऽयम् ।

लक्ष्मण - वेद्गतानि पदानि परिशील्य भाषाणामपि षट् भावविकाराः सन्तीति निश्चित्य भाषाशास्त्रमेकं रचयित्वा स्वकपोलकल्पितान् सिद्धान्ताभासान् सर्वत उद्घोषयन्ति ।

राम - प्राचीनैवेयं सरणिः श्रीमद्भिर्यास्कप्रमुखैर्नैरु क्तैरुपदिष्टैवेति श्रूयते । पाश्चात्यानां भाषास्वरूपमधिकृत्य आशयविशेषाः निरुक्तपठनादेव समुत्पन्ना इति किल कथयन्ति ।

लक्ष्मण - पुरा सर्वेप्यस्मत्पूर्वपुरुषाः कुत्रचिद्गिरिप्रान्तदेशे अवसन् । ततो जनबाहुल्यात् तेषु केचित्प्रतीचीं दिशं गत्या ईरोप् देशे कृतनिलया बभूवुः । केचन दक्षिणाभिमुखं प्रस्थिताः भारतवर्षमिममाजग्मुः । अतः आङ्ग्ला वयं च आर्याः विप्रकृष्टा बान्धवाः इत्यादयः सिद्धान्ताभासाः यास्कादिभिः स्वप्नेप्यविदिताः पाश्चात्यैरुद्धुष्यन्ते ।

राम - तावता किं नः च्छिन्नम् ।

लक्ष्मण - पञ्चमाः ब्राह्मणाश्च एकजातीया इति सिद्धान्तः कथमभिजनैर्नाभ्युपगम्यते ।

राम - पञ्चमाः आर्याणामागमनात्पूर्वमेवेमं देशमधिवसन्तः द्रामिडा इति व्यवह्रियन्ते ।

लक्ष्मण - वयमपि द्रमिडभाषां व्याहरन्तः द्रामिडा एव ।

राम - अस्मदीया प्राचीनभाषा गैर्वाण्येव । चिरं द्रमिडेषु निवसन्तः द्रमिडभाषामभ्यस्य व्यवहारे तामेव भाषां प्रयुञ्ज्महि । तावता वयं द्रमिडा न भवेम ।

लक्ष्मण - द्रमिडभाषाया अपि गैर्वाण्येव मातृभूता ।

राम - न हि न हि । द्रमिडभाषासु गैर्वाणीमयानि कानिचन पदानि प्रवेशमलभन्त । तथैव बह्वीषु भाषासु भाषान्तरगतानां पदानां स्वीकारस्तदा तदा संभवत्येव ।

लक्ष्मण - गैर्वाण्यभावे द्रमिडभाषाया असंभव एव ।

राम - द्रमिडभाषा व्यवहारेषु सर्वदोषयुक्ता जीवति । गैर्वाणी तु न तथा ।

लक्ष्मण - द्रमिडभाषायाः भाषात्वमेव न मया अभ्युपगम्यते ।

राम - भवता नाभ्युपगम्यते चेदपि अन्यैरभ्युपगम्यते ।

लक्ष्मण - द्रमिडभाषायां संपूर्णा वर्णावलिर्नास्ति । क ख ग घ इति चतुर्णामपि स्थाने क इत्येक एव वर्णः द्राविड्याम् ।

राम - आङ्ग्लवाण्यां F Z W इति वर्णानि सन्ति । तानि गैर्वाण्यां नोपलभ्यन्ते इति हेतोः गैर्वाण्याः भाषात्वमपवदितुं को वा शक्नुयात् ।

लक्ष्मण - भवता निर्दिष्टानि वर्णानि अर्धाक्षराणि । तेषामभाव एव गैर्वाण्या उत्कर्षाधायकः इति पण्डिता मन्यन्ते ।

राम - अनुस्वारविसर्गादयोऽपि अर्धाक्षरत्वेन परिगण्यन्ते शाब्दिकैः ।

लक्ष्मण - तादृशानां वर्णानामभावे कथमिव भाषा प्रयोगोपयोगिनी भवेत् ।

राम - तत्तद्वर्णास्तत्तद्भाषाणां प्रयोगे अत्यन्तमावश्यका एव ।

लक्ष्मण - आङ्ग्लभाषा हि नाम मया बहुवारं श्रुता । पक्षिणां वाशितमिवात्यन्तमव्यक्तमुच्चार्यते किलेयम् ।

राम - तद्भाषाभिज्ञानां सा व्यक्तैवेत्यनुश्रूयते ।

लक्ष्मण - गैर्वाण्यां श्रुतायां यावच्छ्रवणसुखमनुभूयते तावन्नास्ति आङ्ग्लवाण्यामिति भाषाद्वयवेदिनो मन्यन्ते ।

राम - किंदेशीयास्ते ।

लक्ष्मण - अस्मद्देशीया एव ।

राम - भाषाद्वयवेदिनामाङ्ग्लानामस्मिन्विषये कीदृशोऽभिप्राय इति अपि नाम जानीषे ।

लक्ष्मण - तादृशाः पाश्चात्येषु न सन्ति ।

राम - मोक्षमूलभट्टादयो बहवः गैर्वाण्यां विचक्षणा इति जनाः कथयन्ति ।

लक्ष्मण - सत्यम् । परं हीमे गैर्वाणीं सुस्वरमुच्चयारयितुं न प्रभवन्ति ।

राम - न कोऽपि हिन्दुदेशीयः आङ्ग्लवाणीसमुच्चारणे ऐरोपीयमनुकर्तुं शक्नोतीति ते विश्वसन्ति ।

लक्ष्मण - भोः शास्त्रिवर्य शापितोऽसि ब्राह्मणकाम्यया । तथ्यं वक्तव्यम् । यथा अस्मदीया आङ्ग्लवाण्यां प्रावीण्यमधिगच्छन्ति तथा आङ्ग्ला गैर्वाण्यां नैपुण्यमावहन्ति इति सशपथमुच्यताम् । अस्मदीयाः केचन आङ्ग्लवाण्युच्चारणे आङ्ग्लानप्यधरीकुर्वन्ति इति मया सशपथं वक्तुं शक्यते एव ।

राम - आङ्ग्लवाण्यां तादृशं प्रवेशमधिगतवन्तः अस्मदीयाः गैर्वाणीं विद्विषन्ति ।

लक्ष्मण - अत्र नैते तपस्विनः अपराध्यन्ति । परं पाश्चात्यविद्याभ्यासेन यद्यदैहिकसुखस्यानुपयुक्तं तत्सर्वं परिवर्जनीयमिति दृढः संस्कारः संभवत्येतेषाम् ।

राम - गैर्वाणीश्रवणेन श्रुतिसुखं भवति किल ।

लक्ष्मण - न किञ्चिदेतत् ।

राम - तर्हि संगीतश्रवणमपि तादृशमेव ।

लक्ष्मण - सत्यम् । संगीतमपि साहित्यं सरस्वत्याः स्तनद्वयम् इत्यभियुक्ता वदन्ति । अथापि देववाण्यामादरो न भवति पापात्मनाम् ।

राम - ये हि नाम गैर्वाणीमाद्रियन्ते त एव पुण्यजन्मान
इति हि भवान्मन्यते ।

लक्ष्मण - अथ किम् ।

राम - भो मर्षय । गैर्वाण्यां निष्णाताः पण्डिताः प्रायेण असूयालवः अन्योदयासहिष्णवः दुरभिमानिनः परस्परं कलहायमाणाः पुण्यजनानतिशेरते । अतस्तादृशविद्याभ्यासेन न काप्यात्मगुणसंपत्तिरधिगम्यत इति तस्यामादराभाव आधुनिकानामिति तर्कयामि ।

लक्ष्मण - उत्तानहृदयाः पण्डिताः असूयां क्रोधं चान्तर्निगूहितुं न शक्नुवन्ति । आङ्ग्लवाण्यभिज्ञास्तु ।
बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि लघुतराणि स्थगयति ।
जनं विद्वानेकः सकलमभिसंधाय कपटैः
तटस्थः स्वानर्थान्घटयति च मौनं च भजते ॥

इत्युक्तरीत्या आकारगोपनं कुर्वन्तोऽप्यन्तःपदुप्रसरामसूयां निरोद्धुमशक्नुवन्तः गूढमन्येषां विप्रियमाचरन्ति ।

राम - उत्तानहृदयः क्षोभेन हृद्गतमखिलं बहिर्वमन् यथाजातेषु परिगण्यते ।

लक्ष्मण - कापट्यादपि ऋजुतैव स्पृहणीया ।

राम - क्रोधेन सदसि वाक्पारुष्येणात्मनो मनोविकाराविष्करणमेव ऋजुता चेन्नमस्तादृशेभ्यः ऋजुकेभ्यो विद्वद्भ्यः ।

लक्ष्मण - केचन स्वभावेनैव क्रोधनाः तदा तदा बुद्धिविक्षेपेण यत्किमप्याचरन्ति । तादृशाः सर्वत्रोपलभ्यन्ते । अत्र गैर्वाणी नापराध्यति । उक्तं चाभियुक्तैः ।
यः स्वभावो हि यस्यास्ते स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ॥

इति । मया हि नाम सर्वसमैवेयमसूया पण्डितास्तां निष्फलं बहिः प्रकाशयन्ति आङ्ग्लास्तु न तथा इत्यभिप्रायः सूचितः ।

राम - तर्हि जनानां गैर्वाण्यामनादरस्य किं कारणम् ।

लक्ष्मण - वित्तेषणैव ।

राम - वित्तेषणेयं भगवती सर्वानप्याकुलयति ।

लक्ष्मण - गैर्वाणीपठनेन प्रभूतं द्रविणमार्जयितुं न शक्यते । भाषेयं मृता तदभिज्ञाश्च मृतप्रायाः इति प्रायो राजभाषावेदिनो मन्यन्ते ।

राम - भाषायां पाण्डित्यसंपादनं केवलमात्मसंस्काराय न तु द्रविणार्जनाय इति विश्वसन्ति देशान्तरीयाः ।

लक्ष्मण - पुरा अस्मद्देशेप्येवमेवासीत् । अध्यापनं नाम विप्राणां स्वीया वृत्तिः । प्रतिफलमनपेक्ष्यैव वेदाः शास्त्राणि चाध्यापनीयानि । यो हि विद्वानात्मना पठितस्य शास्त्रस्य प्रवचनं विनैव देहयात्रां करोति स ह्यन्यस्मिन् जन्मनि ब्रह्मराक्षसो भवति । अद्य तु सर्वस्यापि प्राचीनधर्मस्योत्सर्गः क्वचित्क्वचिद्विपरीताचरणमपि विपश्चिद्भिर्निश्शङ्कमनुष्ठीयते ।

इति शम् ॥

शब्दार्थ (हिन्दी, English)
१. जिह्रेमि - लज्जित होता हूँ । I feel embarrassed
२. सत्ता - अस्तित्व । Existence
३. अर्धचन्द्रं दत्त्वा - गला दबाना । Hold by neck
४. विपश्चिद्भिः - विद्वानों द्वारा । by the scholars
५. सोपपत्तिकम् - आधारसहित । with substance
६. आटीकते - घूमता-फिरता है । moves about
७. उद्युञ्जते - उद्यम करते हैं । (They're) trying to
८. बुद्धिवैशद्यम् - कुशाग्रबुद्धि । Sharp-intellect
९. कार्त्स्न्येन - पूर्ण रूप से । by entirety
१०. दैवायत्ते - भाग्याधीन में । under control of destiny
११. कर्मविपाके - कर्मफलसिद्धान्त में । In the ripening of actions
१२. छन्दसाम् - वेदों के । of the vedas
१३. समुन्मिषति - उदित होती है । rises
१४. भिषग्वराः - औषध देने वालें । Doctors of medicines
१५. अवयवानाम् - अंगों का । of body organs
१६. वाग्व्यापारः - बोल-चाल । Conversation
१७. विप्रतिपत्तिः - मतभेद । Disagreement

१८. भिन्नरुचिः - अलग-अलग रुचि रखने वाला । of different interests
१९. सौकुमार्य - कोमलता । Delicacy
२०. द्रमिडभाषागणः - द्रविड भाषा समूह । Dravidian Language Family
२१. वैदुष्यस्य - विद्वत्ता का । of scholarliness
२२. निकषत्वेन - कसौटी के आधार से । as the qualities of touch-stone
२३. निरूपणशीलाः - निर्धारण करने वालें । Analysts
२४. सदसद्विवेचनम् - सत्य और असत्य का अंतर करना । Discrimination between the real and the unreal
२५. सत्वोद्रेकः - सत्यभाव का उदय । Rise of true nature
२६. अनुसेवताम् - सेवन करने वालों का । Of the consumers
२७. पार्थिवभोगान् - लौकिक भोगों को । The Earthly pleasures
२८. देहात्मवादिनः - शरीर से इतर आत्मा को नकारने वाले । Mortalists
२९. आत्मगुणसंपत्तिः - आत्मा के गुण-गण । Group of qualities of soul
३०. सिद्धान्ताभासान् - भ्रामक सिद्धांतों को । Delusional doctrines
३१. नैरुक्तैः - व्युत्पत्तिशास्त्र के जानकारों द्वारा । by the etymologists
३२. प्रतीचीम् - पश्चिम को । to the West
३३. कृतनिलयाः - जिनके पास घर हो । who are housed
३४. विप्रकृष्टाः - दूर के । Distant
३५. छिन्नम् - परेशानी । Hurdle
३६. अभिजनैः - प्रतिष्ठित जनों के द्वारा । By the noble
३७. अभ्युपगम्यते - स्वीकार किया जाता है । being acknowledged
३८. द्रामिडाः - द्रविड़ । Dravidian
३९. अपवदितुम् - खंडन करना । To refute
४०. आधायकः - सहायक । Supportive
४१. शाब्दिकैः - शब्दशास्त्रों के जानकारों द्वारा । by the lexicographers
४२. वाशितम् - कूज । Chirping
४३. मोक्षमूलभट्टः - मैक्समूलर नामक विद्वान् । Scholar Max Muller
४४. प्रावीण्यम् - वाक्कुशलता । Conversiveness
४५. नैपुण्यम् - कुशलता । Expertise
४६. आवहन्ति - पा सकते हैं । Obtain
४७. अधरीकुर्वन्ति - नीचा दिखाते हैं । Outperform
४८. ऐहिकसुखस्य - इस लोक के सुख का । Of the worldly pleasure

४९. श्रुतिसुखम् - कानों का सुख । The pleasure of hearing
५०. अभियुक्ताः - विद्वान् । The learned
५१. पुण्यजन्मानः - शुभ जन्मे हुए । The virtuous born
५२. मर्षय - छोड़ें । Excuse
५३. उत्तानहृदयाः - सीधे हृदय वाले । Frank-hearted
५४. निष्णाताः - कुशल लोग । The proficient
५५. असहिष्णवः - असहिष्णु लोग । Intolerant ones
५६. कलहायमाणाः - झगड़ते हुए लोग । Being quarrelsome
५७. अतिशेरते - अतिक्रमण करते हैं । (They) Overshadow
५८. अन्तर्निगूहितुं - अन्दर छिपाने के लिए । For concealing within
५९. आकारः - मानसिकता । Mental disposition
६०. पराभ्यूहस्थानानि - दूसरों के विमर्श की दुर्बल कड़ियाँ । Vulnerabilities of the inference of others
६१. उपानहम् - जूते को । Shoe
६२. यथाजातेषु - नवजातों में । Among noobs
६३. ऋजुकेभ्यः - सीधे लोगों से । From the simple-minded
६४. द्रविणम् - धन को । Wealth
६५. वित्तेषणा - धन की इच्छा । Desire for wealth
६६. प्रतिफलम् - फल । Return
६७. उत्सर्गः - त्याग । Abandonment

Amaravani SamvAdaH

pdf was typeset on May 2, 2025

Please send corrections to *sanskrit@cheerful.com*